ध्यापक इति। अध्यापकश्च द्विविधः आचार्य्य उपाध्यायश्च यथोक्तं विष्णुना "यस्तूपनीय व्रतादेशं कृत्वा वेदमध्यापयेत्तमाचार्य्यं विद्यात्। यस्त्वेनं मूल्येनाध्यापयेदेकदेशं वा तमुपाध्यायमिति"।

**अध्यापन** न० अधि+इङ्–णिच्–भावे ल्युट्। पाठनायाम्। "याजनाध्यापनं तथेति" मनुः। "अध्यापनञ्च त्रिविधं धर्म्मार्थमृक्थकारणम् शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितमिति" हारीतसंहितोक्तेस्त्रिविधमध्यापनम्। अध्यापनप्रकारादि यथा "नापरीक्षितं याजयेत् नाध्यापयेत् नोपनयेत॥ योऽधर्म्मेणाह यश्चाधर्म्मेण पृच्छति तयोरन्यतरः प्रैति, विद्वेषं वाधिगच्छति॥ धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा। तत्र विद्या न वप्तव्या शुभं वीजमिवोषरे। विद्याह वै ब्राह्मणमाजगाम गोपाय मां शेवधिस्तेऽहमस्मि। असूयकायानृजवेऽयताय न मां ब्रूया वीर्य्यवती तथा स्याम्॥ यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्। यस्ते न द्रुह्येत् कतमाञ्च नाह तस्मै मां ब्रूया विधिपाय ब्रह्मन् इति"॥ युचि तु स्त्रीत्वात् टापि, अध्यापना तस्मिन्नेवार्थे स्त्री।

**अध्यापित** त्रि० अधि–इङ्–णिच् कर्म्मणि क्त। पाठिते "अध्यापितस्योशनसापि नीतिमिति" कुमा०।

**अध्याप्य** त्रि० अधि इङ्–णिच–कर्म्मणि यत्। पाठनीये अध्यापयितुमर्हे छात्रे "ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रिय" इति मनुनाध्यापनीयार्हता दर्शिता।

**अध्याय** पु० अधि+इङ्–घञ्। अध्ययने, कर्म्मणि घञ्। वेदादिशास्त्रस्य एकार्थकविषयसमाप्तिद्योतके विश्रामस्थाने अंशविशेषे, "सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च। स्थानं प्रकरणञ्चैव पर्व्वाह्निकानि च। पुराणादौ परिच्छेदा अनेके परिकीर्त्तिता" इत्युक्तान्यतमप्रकारे च "संकल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः अध्याय प्राप्य विरमेन्न तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पुनः पठेदिति" म० स्त०। "स्वाध्यायोऽध्येतव्य" इति श्रुतिः।

**अध्यारूढ** त्रि० अधि+आ+रुह कर्म्मणि कर्त्तरि वा क्त। आक्रान्ते, अध्यारोहणकर्त्तरि उपरिष्टात् आरोहणकर्त्तरि, समारूढे, अधिके च।

**अध्यारोप** पु० अधि+आ–रुह–णिच्–पान्तादेशः घञ् अतस्मिन् तद्बुद्धिरारोपः मिथ्याज्ञानम् किञ्चिदधिष्ठानमधिकृत्य तादृशारोपः अध्यारोपः यथा असर्पभूतां रज्जुमधिकृत्य सर्पारोपः तथैव अजगद्रूपे ब्रह्मणि जगद्रूपारोपः। तादृशे मिथ्याज्ञाने। "स एष वीजाङ्कुरादिवदविद्याकृतः संसार आत्मनि क्रियाकारकफलाध्यारोपलक्षणोऽनादिरनन्त" इति वृ० उप० भाष्यम्।

**अध्यारोपण** न० अधि+रुह–णिच् पान्तादेशः ल्युट्। अतिशयेनारोपणे धान्यादेर्वपने।

**अध्यावाप** पु० अधि+आ+वप–घञ्। अधिवपने स्वस्थानामावापे। आधारे घञ्। तदाधारक्षेत्रे।

**अध्यावाहनिक** न० अध्यावाहनं पितृगृहात् भर्त्तृगृहागमनं तत्काले लब्धम् अधि+आ+वह–ल्युट् ततः लब्धार्थे ठन्। "यत् पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावाहनिकं नाम स्त्रीधनं परिकीर्त्तितमिति" स्मृत्युक्तलक्षणे पितृकुलात् भर्तृकुलगमनकाले तेभ्यः प्राप्ते स्त्रीधने। "अध्यग्न्यध्यावाहनिकं स्त्रीधनं षड्विधं स्मृतमिति" स्मृतिः।

**अध्यास** पु० अधि+अस–क्षेपे घञ्। मिथ्याज्ञाने "आह कोऽयमध्यासो? नामेति प्रश्ने "स्मृतिरूपः परत्र पूर्व्वदृष्टावभास" इति शा० भाष्यम्। स्मृतेः रूपमिव रूपमस्य संस्कारप्रभवत्वात्। परत्र अन्यस्मिन् स्वभिन्ने स्वाभाववति च पूर्व्वदृष्टस्य पूर्व्वानुभूतस्यावभासो ज्ञानम्। यथा शुक्तौ रजतभिन्नायां पूर्व्वदृष्टस्य रजतस्याभेदज्ञानम्, स्वाभाववति च स्फटिके पूर्व्वानुभूतस्य लोहितरूपस्य वा ज्ञानम्। तथाभूते मिथ्याभूतज्ञाने। तत्र चाध्यासे अधिष्ठानशुक्त्यादौ इन्द्रियसंप्रयोगे सत्यपि तस्य विशेषरूपेणाज्ञानात् सामान्याकारेण इदन्त्वादिरूपेण ज्ञानं, सादृश्यज्ञानम्, आरोप्यमाणस्य संस्कारश्चेति कारणत्रयं सति च तस्मिन् चाकचक्यादिदोषविशेषात् अधिष्ठानविशेषज्ञानं प्रतिरुध्य, रजतादिसंस्कारे चोद्बोधिते तत्रानिर्वचनीयं रजतादिकं शुक्त्याद्यज्ञानेनोत्पाद्यते तदाकारवृत्तिश्च जन्यते तत्र आविद्यिकरजताद्युत्पत्तौ इदं रजतं पश्यामीत्याद्यनुभवानुपपत्तिः नच स्मरणेन तस्योपपत्तिः स्मरणस्य विषयाप्रवर्त्तकत्वात् तदुत्तरं प्रवर्त्तते च तत्तद्ग्रहणाय सर्वः। नापि अलौकिकप्रत्यक्षरूपता साक्षात्करोमीत्यनुभवस्य साक्षात्कारविषयत्वात् अन्यथानुमानादीनामपि अलौकिकप्रत्यक्षत्वापत्तेः तत्पूर्व्वं नियतं तत्तज्ज्ञानस्यावश्यम्भावेन विशिष्टालौकिकप्रत्यक्षापत्तेर्दुर्निवारत्वात् अतः तत्तद्ग्रहणाय प्रवर्त्तकस्य तत्तज्ज्ञानस्य प्रत्यक्षत्वसमर्थनाय अनिर्वचनीयं रजतादिकम् अधिष्ठानाज्ञानेन तत्राधिष्ठाने उत्पद्यते इति कल्प्यं प्रत्यक्षे हि विषयसन्निकर्षः कारणत्वेन क्लृप्तः